**विषारि** पु॰६त॰। १धृतकरञ्जे २महाचञ्चुशाके च राजनि॰

**विषास्य** पु॰ विषमास्ये यस्य। १सर्पे शब्दच॰ विषाननादयो-ऽप्यत्र। विषास्त्रमिवास्यमस्याः। २भल्लातके स्त्री शब्दच॰।

**विषु** अव्य॰विष-कु। १साम्ये भरतः। २नानारूपे रामाश्रमः

**विषुव** न॰ विषु दिनरात्र्योः साम्यं वाति वा-क। १सम-रात्रिदिनकाले अमरः। अयनांशक्रमणे २रवेः तुला-मेषराशिसंक्रान्तिभेदे च

“मृगकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने। विषुवती तुलामेषे गोलमध्ये तथापरा” ज्यो॰त॰। “भचक्रनाभौ विषुवद्द्वितयं समसूत्रगम्। अयनद्वितयं चैव चतस्रः प्रथितास्तु ताः” सू॰ सि॰। “भचक्रनाभौ भगोलस्य ध्रुवद्वयाभ्यां तुल्यान्तरेण मध्यभागे विषुवद्द्वितयं समसूत्रगं परस्परं व्यासतुल्यान्तरितं ध्रुवमध्ये विषुवद्वृत्त-स्थानात् तद्वृत्ते क्रान्तिवृत्तभागौ यौ लग्नौ तौ क्रमेण पूर्वापरौ विषुवत्सञ्ज्ञौ मेषतुल्याख्यौ चेत्यर्थः” रङ्ग॰ कालभेदे विषुवत्क्रमणारम्भांशभेदः अयनसंक्रान्तिशब्दे दर्शितः तत्कालस्तु ज्यो॰संक्षिप्य कालभेदे विषुवारम्भणाद्युक्तं यथा “मेषसंक्रमतः पूर्वं पश्चात्तद्रादिनान्तरे। प्राति-लोम्येन साम्येन विषुवारम्भणं भवेत्। त्रयोदशदिने सौरे चैत्रे नखतिथौ १५२०शके। विषुवारम्भणं तत्र समं मानं दिवानिशोः। ततः प्रतिदिनं वेला सपादत्रिपला-त्मिका। वर्द्धते मेषविंशांशपर्य्यन्तं स्थूलमार्गतः। तथाद्यैशान्तपर्य्यन्तं पादोनत्रिपलात्मिका। तादृशा-शादपर्य्यन्तं पलैकप्रमिता मता। ततः कर्कटविंशांश-पर्य्यन्तं प्रत्यहक्रमात्। सपादपलमानेन वेला तु-ट्यति निश्चितम्। तादृग्भाद्रान्तपर्य्यन्तं पादोनत्रि-पलात्मिका। दिवामानं दशषट्व्यक्ता रात्रेः प्रमा-णकम्। वैशाखादौ दिवामानं रात्रिमानं तुलादिषु। षट्षष्टिवत्सरानेवं ततः स्यात् द्वादशांशके। पुनस्तद्वत् सरांस्तद्वत् तत्र एकादशादिके”। [विषुवशब्दार्थे।

**विषुवत्** न॰विषु साम्यं दिवानिशोरत्रास्ति मतुप् मस्य वः।

**विषौषधी** स्त्री ६त॰। नागदन्त्याम् रत्नमा॰।

**विष्क** हिंसायां चु॰ आ॰सक॰ सेट्। विष्कयते अविविष्कत दर्शने उभ॰ सेट्। विष्कयति ते अविविष्कत् त।

**विष्कम्भ** पु॰ वि+स्तम्भ-अच्। सूर्य्यचन्द्रयोगजातयोग-मध्ये प्रथमे १योगे ज्यो॰त॰ २विस्तारे ३प्रतिबन्धे ४रूप-कनाटकाङ्गभेदे “अर्थोपक्षेपकाः पञ्च विष्कम्भकप्रवेशकौ। चूलिकाङ्कावतारोऽथ स्यादङ्कमुखमित्यपि। वृत्तवर्त्तिष्य-माणानां कथांशानां निदर्शकः। संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः। मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः। शुद्धः स्यात् स तु सङ्कीर्णो नीचमध्यम-कल्पितः” सा॰द॰। ५योगिनां बन्धभेदे मेदि॰ ६वृक्षे अजयः ७अवष्टम्भके अमरः ८कीलकादौ च भरतः। ९पर्वतभेदे विपुलशब्दे दृश्यम्।

**विष्कल** पुंस्त्री॰ विषं विष्ठां कलयति कलि-अण् पृषो॰। ग्राम्यशूकरे राजनि॰ स्त्रियां ङीष्।

**विष्किर** पुंस्त्री॰ विकिरति वि+कॄ-क सुट् च। १विहगे अमरः स्त्रियां ङीष्। २विहगभेदे भावप्र॰ “वर्त्त-कालावविकिरकपिञ्जलकतित्तिराः। कुलिङ्गकुक्कुटा-द्याश्च विष्किराः समुदाहृताः। विकीर्य्य भक्षयन्त्येते यस्मात्तस्माद्धि विष्किराः। कपिञ्जल इति प्राज्ञैः कथितो गौरतित्तिरः”। कुलिङ्गः (कएर) इति लोके। “वि-ष्किरा मधुराः शीताः कषायाः कटुपाकिनः। बल्या वृष्यास्त्रिदोषघ्नाः पथ्यास्ते लघवः स्मृताः”।

**विष्टप** न॰ विश-कपन् तुट् च। भुवने अमरः।

**विष्टब्ध** त्रि॰ वि+स्तम्भ-क्त। प्रतिरुद्धे अवरुद्धे

**विष्टम्भ** पु॰ वि+स्तम्भ-घञ्। १प्रतिबन्धे २आनाहे रोग-भेदे च आनाहशब्दे ७२९ पृ॰ दृश्यम्। [जनके च।

**विष्टम्भिन्** त्रि॰वि+स्तम्भ-णिनि। १प्रतिबन्धके २रोगविशेष॰

**विष्टर** पु॰ वि+स्तॄ-अप् षत्वम्। “ऊर्द्धकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः” इति “वामावर्त्तस्तु विष्टर” इति च स्मृत्युक्ते दर्भकृते १आसनभेदे २आसनमात्रे ३वृक्षे ४कुशमुष्टौ च अमरः। [विष्णौ अमरः।

**विष्टरश्रवस्** पु॰ विष्टरः कुशमुष्टिरिव श्रवसी कर्णौ यस्य।

**विष्टरुहा** स्त्री विष्टा भूमौ प्रविष्टा सती रोहति रुह-क। स्वर्णकेतक्यां राजनि॰। [शब्दे २६२८ पृ॰ दृश्यम्।

**विष्टार** पु॰ वि+स्तॄ-घञ् षत्वम्। पङ्क्तिच्छन्दोभेदे छन्दः-

**विष्टि** स्त्री विष-क्तिन् क्तिच् वा। वेतनं विना भारादिव-हनजन्ये १क्लेशे अमरः। २वेतने ३कर्मणि ४वर्षणे ५तिथ्यर्द्धात्मककरणमध्ये सप्तमे करणे विघ्नः। भद्रशब्दे ४६२७पृ॰ दृश्यम्। ६प्रेषणे हेमच॰। ७कर्मकरे शब्द॰ ८वेतनं विना कर्मकरे च त्रि॰ मेदि॰।

**विष्ठल** न॰विप्रकृष्टं स्थलम् प्रा॰स॰षत्वम्। दूरस्थस्थले सि॰कौ॰

**विष्ठा** स्त्री विविधं तिष्ठति स्था-क षत्वम्। १उदरे शब्दमाला २पुरीषे अमरः।

**विष्णु** स्त्री विष-व्यापने नुक्। १व्यापके परमेश्वरे अमरः